ISSN 2454-8596
www.vidhyayanaejournal.org
An International Multidisciplinary Research e-Journal

# विभिन्नवैयाकरणानां मतानुसारं कारकलक्षणम्

**Kaushik A Rajyaguru**

**इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम् ।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ।। काव्यादर्शः १–४ ।।**

यद्यस्मिन् जगति शब्दाह्वयं ज्योतिरासंसारं न दीप्यते चेत् भुवनत्रयमिदमन्धन्तमः जायेतेति दण्डीवचनम् । व्यवहारिकजीवनेऽपि 'शब्द'स्य व्यापकमहत्ता वर्तते । जगतोऽस्य निबन्धनी शक्तिस्तु शब्देष्वेवाश्रिता । भाषाकीयव्यवहारे शब्दस्योपयुक्तता पदे पदे वर्तते । खल्वत्र शब्दस्य प्रयोगोऽर्थगत्यर्थकः । वैयाकरणाः मन्यन्ते यदेतत्प्रकारस्यार्थबोधोऽर्थाभिव्यक्तिर्वा नैकानां शब्दानां समुदायरूप'वाक्येन' जायते, वाक्यतो भिन्नानां शब्दानां पदानां वा न कापि पृथक् सत्ता ।

लोकव्यवहारे यदा 'उत्तमपुरुष–मध्यमपुरुषयोः' संवादे खलूपस्थितान्य– पुरुषविशेषोऽपि **गामानय, गां नय** वेत्यादीनि वाक्यानि शृणोति, तदा प्रथममर्थं विचारयति, तदनन्तरं वाक्यस्थानां पदानामावापोद्वापप्रक्रिययान्वयव्यतिरेकपद्धत्या वा तत्तत्पदानामर्थनिर्णयं करोति तथापि तत्र वाक्यगतः समस्तोऽर्थस्तु प्राधान्यतामाप्नोत्येव ।

कृता तद्वाक्यस्वरूपविषयकी विपुलमात्रायां चर्चा वैयाकरणैः साहित्यिकै– र्मीमांसकैर्नैयायिकैरन्यैश्च । तत्र खलु वाक्ये 'आकाङ्क्षायाः योग्यतायाः सन्निधेश्चानिवार्यता स्वीकृता काव्यशास्त्रिभिः ।[1]'

अथ खलु मानस–अभिव्यक्तये प्रयुज्यमानेषु प्रत्येकेषु वाक्येषु प्रायः क्रियायाः कारकाणाञ्च दर्शनं भवति । यद्यपि वैयाकरणानां मतानुसारं कस्यापि वाक्यस्य शाब्दबोधः क्रियाप्राधान्यत्वात्, वाक्ये क्रियायाः प्राधान्यम्, तथापि सा क्रिया कारकसहायत्वात्, व्यवहारे कारकाणामपि प्राधान्यम् ।

## कारकलक्षणम्

[1] वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः ।। सा.द. २:१ ।।

अत्र खल्वस्य 'कारक'तत्त्वस्यैव विचारविमर्शोऽभीष्टः । क्रियासिद्धौ सहायभूतानां द्रव्याणां क्रियया सह सम्बन्धविषयकी चर्चा कृता वैयाकरणैः । कारकस्य क्रियया सह (१) साध्यसाधकभावसम्बन्धः (२)उत्पाद्य–उत्पादकभावसम्बन्धो वा मन्यन्ते । अर्थात् वाक्यस्था क्रिया साध्यरूपा तथा च कारकं तत्सिद्धकर्तृकं तत्त्वम् । तथापि यदा क्रिया साध्यावस्थामतिक्रम्य सिद्धावस्थामवाप्नोति तदा क्रिया न भवति साध्यरूपातस्तदा साध्यसाधकभावसम्बन्धोऽपि न वर्तते, किन्तु यावत्पर्यन्तं क्रियासिद्धा वर्तते तावत्पर्यन्तं तु साध्यावस्थायामेव । अतस्तदैव क्रियाकारकयोः परस्परं साध्यसाधकभावसम्बन्ध उत्पाद्योत्पादकभावसम्बन्धो वा सम्भवति ।

'कारक'शब्दस्यार्थो भवति : **करोति तत्कारकम्** । (यः) क्रियां करोति तत्कारकम् । क्रियासिद्धौ यत्सहायकर्तृकः पदार्थः तदेव कारकम् । संक्षिप्ततया क्रियाकर्तृकं कारकम् ।

**डुकृञ् करणे** इत्यस्माद्धातोरनुबन्धलोपे सति कर्तर्यर्थे **ण्वुल्** प्रत्ययः । **युवोरनाकौ ।। पा.सू. ७–१–१ ।।** इत्यनेन सूत्रेण ण्वुलित्यस्य स्थानेऽनादेशे **अचोऽञ्णिति ।। पा.सू. ७–२–११५ ।।** इति सूत्रेणादिवृद्धिस्तदनन्तरं **कृत्तद्धितसमासाश्च ।। पा.सू. १–२–४६ ।।** सूत्रेण कारकेत्यस्य प्रातिपदिकसंज्ञा, 'सु'प्रत्ययः, **अतोऽम् ।। पा.सू. ७–१–२४ ।।** इत्यनेनामादेशे **कारकम्** इति शब्दो निष्पन्नः ।

काशिकाकारः 'कारक'शब्दं निमित्तपर्यायं मन्यते । अर्थात् क्रियासिद्धौ यः पदार्थः निमित्तो भवति तत्कारकम् । अतः कारकशब्दो हेतुपर्यायः, न तयोः शब्दयोर्भेदः ।[2]

क्रियानिर्वर्तकं साधनं चेति शब्दद्वयस्य प्रयोगः कृतः कारकार्थं भर्तृहरिणा । क्रियां निर्वर्तयतीति कारकम्, साध्यतेऽनेनेति साधनम् ।

**(क) करोति कर्तृकर्मादिव्यपदेशानिति कारकम् ।** अयं कर्ता, इदं कर्म, इत्यादिषु व्यवहारेषु या संज्ञा निमित्ता तत्कारकम् । अनेन कारकमर्थात् 'क्रियानिर्वर्तक'शब्दः त्रिविधसन्दर्भे प्रयुक्तः । (१)कस्यापि प्रकारस्य क्रियाकारकभावसम्बन्धो यथापादानादिषु यस्य विशेषविधानं १–४–२४ तः १–४–५५ पर्यन्तेषु सूत्रेषु वर्तते

[2] कारकशब्दश्च निमित्तपर्य्यायः । कारकं हेतुरित्यनर्थान्तरम् । कस्य हेतुः ? क्रियायाः । का.वृ. १/४/२३ इत्यत्र ।

तत्कारकम् । (२)क्रियासिद्धावुपकारकं व्यक्तिं पदार्थं वा 'कारक'मिति कथ्यते । (३)क्रियासिद्धावुपकारकस्य व्यक्तिवाचकस्य पदार्थवाचकस्य यः शब्दस्तत्कारकम् ।

**(ख)** ''कारकाधिकारे परिगणितपदार्थानां यस्यापादानादिविशेषसंज्ञाः क्रियन्ते, तदेव कारकम् । अर्थात् ये पदार्थाः क्रियासिद्धावुपकारका भवन्ति, किन्तु यदि पाणिनिना तेषां पदार्थानां कारकसंज्ञा न कृता चेत्ते पदार्थाः 'कारक'संज्ञाविशेषाः न । उदाहरणरूपेण 'कालाध्वना'विति शब्दद्वयं यदि कस्या अपि क्रियायाः निमित्तरूपं वर्तते, तथापि तस्य कारकसंज्ञा न भवति । तस्य **कालाध्वनोरत्यन्तसंयोगे ।। पा.सू. २-३-५ ।।** इति सूत्रेण द्वितीयाविभक्तिः । अतो 'मासम् अधीते' इत्यादिषूदाहरणेषु 'मास'पदार्थमधिकृत्य द्वितीयाविभक्तिः, क्रियाकारकभावस्य वाचिका न । अत्र कर्मसंज्ञा न कृता पाणिनिना ।

अतस्तार्किकदृष्ट्या कस्यचिदपि पदार्थस्य कारकत्वेऽपि यदि पाणिनिना कारकाधिकारे तस्योल्लेखो न कृतश्चेत्तन्न कारकत्वम् । अनेन प्रकारेण कारकाधिकारे पठितमिति कारकलक्षणम् ।

**(ग) क्रियान्वितत्वं कारकत्वम् ।** यस्य क्रियायामन्वयो भवति तत्कारकम् । **उदाहरणार्थं रामः रावणं बाणेन लङ्कायां हतवान् ।** अत्र रामः कर्तृत्वेन, रावणं कर्मत्वेन, बाणः करणत्वेन, लङ्का चाधिकरणत्वेन हननक्रियामुत्पादयति । अतस्ते पदाः कारकत्वेनाङ्गीक्रियन्ते किन्तु यदि **दशरथस्य (पुत्रः) रामः रावणं बाणेन लङ्कायां हतवान् ।** इत्यत्र दशरथ इति पदस्य सम्बन्धः 'राम'इति शब्देन सह वर्तते न तु क्रियया सह । क्रियायां दशरथशब्दो नान्वितः । अतो न कारकत्वम् । किन्तु सैद्धान्तिकरीत्या लक्षणमिदं स्वीकृतं भवितुं नार्हति । कारणं **यस्य च भावेन भावलक्षणम् ।। पा. सू. २-३-३७ ।** सूत्रविहित-सति-सप्तमी-विभक्तेः क्रियायामन्वयो वर्तते, तथापि भाष्यकारः तस्योपपदविभक्तित्वेन स्वीकारः करोति, न तु कारकविभक्तित्वेन । अथ च कारकाधिकारपठितत्वेन नास्याः विभक्तेर्विधानम् । अतः सिद्धं भवति यत् 'क्रियायामन्वय'इत्येव न कारकहेतुः ।

**(घ) क्रियाजनकत्वं कारकत्वम्** इति कारकलक्षणं प्रतिपादयति नागेशभट्टः । अस्यैव लक्षणस्य तात्त्विकदृष्ट्या

प्रस्तुतीकरणं **'शक्तिः कारकम्'** इत्यनेन भवितुमर्हति । पदार्थे क्रियाजनकत्वशक्तिः कारकत्वेन स्वीक्रियते ।

व्याकरणदृष्ट्या क्रियान्वयित्वं क्रियाजनकत्वं वा कारकत्वम् । भर्तृहरिणोक्तम् – **क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः ।। वा.प. ३–७–१(ख) ।** क्रियासिद्धये पदार्थस्था शक्तिरेव साधनम् ।

धातोरर्थो भवति क्रिया । येन क्रियासिद्धिः स्यात्तत् साधनम् । क्रियासिद्धये पदार्थस्य शक्तिरेव साधनम् । शक्तिरेव गुण इति भाष्यकारस्य मतमर्थात् गुणसमुदायं साधनम् । गुणरूपा शक्तिस्तदाश्रये द्रव्ये प्रवर्तमाना । एतादृश्याः शक्त्याः कारणेन तदाश्रयरूपस्थपदार्थोऽपरपदार्थतो भिन्नः प्रतिभाति । वाक्यपदीयेऽपि दृष्टव्यं यत् –

**शक्तिमात्रासमूहस्य विश्वस्यानेकधर्मणः ।**
**सर्वदा सर्वथा भावात् क्वचिद् किञ्चिद् विवक्ष्यते ।।३–७–२ ।।**

**पाणिनीतरसम्प्रदाये कारकलक्षणम्**

कातन्त्रव्याकरणकारः कारकलक्षणविषये कथयति 'क्रियानिमित्तं कारकम्' । क्रियार्थं यत्पदं निमित्तं तस्य कारकसंज्ञं स्यात् । अर्थात् तन्मतानुसारं क्रियानिमित्तपदं कारकसंज्ञं भवति ।

'कारकं निर्वर्तकं हेतुर्वा । कस्य ? क्रियायाः ।' इति कारकलक्षणं दत्तं जैनेन्द्रव्याकरणस्य **कारके १–२–१०९** इति सूत्रस्य महावृत्तौ आचार्यः अभयनन्दी ।

**सरस्वतीकण्ठाभरणे** कारकलक्षणार्थं तु सूत्रमेकं वर्तते यथा **क्रियानिमित्तं कारकम् । १–१–३२** क्रियायाः यन्निमित्तं तस्य कारकसंज्ञा स्यात् ।

**सिद्धहैमशब्दानुशासने हेमचन्द्राचार्यः** कारकलक्षणं प्रददाति **क्रियाहेतुः कारकम् । २–२–१** इति सूत्रम् ।

क्रियासम्बन्धविशेषि कारकम् । इति कारकलक्षणं हरिनामामृतकारः मन्यते ।

क्रियानिष्पत्तिकारकं कर्त्तादिकारकसंज्ञं भवति–इति 'पाणिनीय व्याकरण का अनुशीलन' पुस्तके प्रदत्तकारकलक्षणम् ।

इत्थं प्रकारेण पाणिनीयसम्प्रदाये पाणिनीतरसम्प्रदाये वा सर्वत्र कारकलक्षणस्य व्यापकचर्चा दृश्यते । प्रायः सर्वेषामपि मतं वर्तते क्रियार्थं निमित्तं यत्पदं तत्कारकं भवेदिति ।